# श्री वाराही देवि स्तुति

## । ध्यानं ।

कृष्ण वर्णां तु वाराहीं महिषस्थां महोदरीं
वरदां दंडिनीं खड्गं बिभ्रतीं दक्षिणे करे
खेट पात्राऽभयान् वामे सूकरास्यां भजाम्यहम् ॥

## । स्तुति ।

नमोस्तु देवि वाराहि जयैकार स्वरूपिणि ।
जपित्वा भूमिरूपेण नमो भगवतः प्रिये ॥ 1

जयक्रोडास्तु वाराहि देवित्वांच नमाम्यहम् ।
जयवाराहि विश्वेशि मुख्य वाराहिते नमः ॥ 2

मुख्य वाराहि वंदेत्वां अंधे अंधिनिते नमः ।
सर्व दुष्ट प्रदुष्टानां वाक् स्तंभनकरी नमः ॥ 3

नमस्तंभिनि स्तंभेत्वां जृंभे जृंभिणिते नमः ।
रुंधे रुंधिनि वंदेत्वां नमो देवीतु मोहिनी ॥ 4

स्वभक्तानांहि सर्वेषां सर्वकाम प्रदे नमः ।
बाह्वाः स्तंभकरी वंदे चित्त स्तंभिनिते नमः ॥ 5

© 2022 Vedam Nadam

चक्षु स्तंभिनि त्वां मुख्य स्तंभिनीते नमो नमः ।
जगत् स्तंभिनि वंदेत्वां जिह्वा स्तंभन कारिणि ॥ 6

स्तंभनं कुरु शत्रूणां कुरुमे शत्रु नाशनम् ।
शीघ्रं वश्यंच कुरुते योऽग्ने वाचात्मिके नमः ॥ 7

ठ चतुष्टय रूपेत्वां शरणं सर्वदाभजे ।
हुमात्मिके फड्रूपेण जय आद्यानने शिवे ॥ 8

देहिमे सकलान् कामान् वाराही जगदीश्वरी ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमोनमः ॥ 9

**। अनुग्रह स्तुति ।**

किं दुष्करं त्वयि मनो विषयं गतायाम् ।
किं दुर्लभं त्वयि विधानुव दर्चितायाम् ॥
किं दुष्करं त्वयि सकृत् स्मृति मागतायाम् ।
किं दुर्जयं त्वयि कृतस्तुति वाद पुंसाम् ॥

॥ इति श्री वाराही देवि स्तुति संपूर्णम् ॥

© 2022 Vedam Nadam